रहविशिष्टसिध्यधिकरण[illegible]थमक्षणध्वंसासत्यधिकरणक्षणोपस्थितिकत्वाभावात्पक्षतावच्छेदकावच्छिन्नकार्यतानिर्वाहः अथवास्वीयव अनुमितेः
हितपूर्वकालावच्छिन्नलिंगकेऽविरहविशिष्टसिध्यभावाधिकरणतावच्छेदकविशिष्टसमवायेनसिध्यभावकार्यतावत्त्वं[illegible]रति
नकोपिदोषः अथवास्ववृत्तिस्वनिरूपितस्ववृत्तिप्रागभावप्रतियोगि[illegible]नाधिकरणेनत्रितयसंबंधेनतादृक्सिद्धिविशिष्टा
न्यत्वंतादृक्सिध्यभावजन्यतावच्छेदकमितिनकोपिदोषः अथवातादृक्सिद्धिविशिष्टस्वाधिकरणक्षणावच्छिन्नध्वंसाधि
करणक्षणध्वंसानधिकरणक्षणोपस्थितिकत्वसहितोत्तरत्वसंबंधेनवाच्येऽनुमूलावलंबनेचतादृक्सिध्याधिकरणक्षणावच्छि
न्नध्वंसाधिकरणमनुमित्युत्पत्तिक्षणएवेतितध्वंसानधिकरणक्षणोपस्थितिकत्वमनुमितेरितिनव्यमिचारः सिध्यात्मक
धूममात्रपरामर्शजन्यानुमितेर्धूमलिंगकेऽविरहविशिष्टसिध्यधिकरणक्षणावच्छिन्नध्वंसाधिकरणद्वितीयक्षण

ध्वंसानधिकरणक्षणोत्पत्तिकत्वविरहात्तु तद्धि विशिष्टसिद्धि विशिष्टान्यत्वमव्याहतमिति एवंयत्रैरूपपरामर्शानंतरं तदप्रामाण्यावगाहि
आलोकपरामर्शस्तदनंतरं मनुमितिस्तत्रानुमितेरप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शविशिष्टस्वरूपाप्रामाण्यज्ञानाभावविशिष्टधूम
परामर्शजन्यतावच्छेदकाक्रांतत्वादव्यवहितपूर्वक्षण[illegible]माण्यज्ञानाभावविशिष्ट परामर्शत्वेनप्रसक्तस्यव्यभिचारस्यैतादृशेऽप्र
कारेवारणमवश्यंलिंगोपधानमेतेचनकाचिदप्यनुपपत्तिः तन्मतेधूमविशिष्टपर्वतांशविज्ञानविशेष्यक वह्यनुमितिहादेरवधूम
लिंगकेछाविरहविशिष्टसिध्यभावादिजन्यतावच्छेदकत्वादुक्तसमूहालंबनस्थलेचालोकवान्पर्वतोवह्निमानित्याकारकानुमि
तेरवापगमेनव्यभिचारानवकाशादिति। धूमनानुमिनुयादालोकेनानुमिनुयादित्यादीछासाधारणरूपेणवासिषाधयिषाणांसि
धावुत्तेजकत्वंतथाचधूमालोकादिलिंगकनिखिलानुमितिसाधारणीकेवपक्षतायुक्तस्थलेऽतिप्रसंगतादवस्थ्यंचप्रतिबंधकांतर
मेवकल्प्यतइत्यायनाहतल्लिंगकेति अत्रसंसिधाधयिलिंगकानुमितीछाकालेऽनुमित्युपपत्तयेसिधिकालीनेतिसामा
नाधिकरण्यसंबंधेनसिधिविशिष्टेत्यर्थः समूहालंबनेछाकालेतिश्लिष्टेऽनुमित्युपपत्तयेतल्लिंगकानुमितीछाविरहविशिष्टेति।

(अ आलोके युत्तरग्रंथसङ्गादालोकलिंगकत्वादिप्रकारतेत्येवकाचित्कःपाठः॥८)
धूमालिंगकत्वादिप्रकारतान्यप्रकारत्वनिरूपितविशेष्यतांकेछाविरहविशिष्ट[illegible]यर्थकं तेनधूमालोकोभयलिंगकवह्न्यनुमितिर्जायतां
मित्याद्याकारकेछाबलात्सिद्धिकालेनकेवलालोकलिंगकानुमितिप्रसंगः नचालोकेनवह्न्यंशेछायानुमितिधूमेनवह्न्यनुमितिर्जा
यतामित्येतादृशेछाकालेसिद्धिसत्वेकेवलालोकलिंगकपरामर्शाकेवलवह्न्यंशेनुमित्यापत्तिःयथापितद्धूमत्वकत्वनिरूपितवि
शेष्यतांकान्यतरस्यविशेषणत्वोपगमएवसमूहालंबनस्थलेऽनुमितिरुपपादयितुंशक्यतेतथापिस्तं[illegible]ज्यायोगपद्यमंगीकृत्व
लांनवीनानांमतेयत्रसिध्यु[illegible]पत्तिकालेधूमलिंगकानुमितीछायास्तद्वितीयक्षणेआलोकलिंगकानुमितीछायाउत्पादस्तत्रा
लोकलिंगकानुमित्युपपत्तयेतादृशविशेष्यतानिरूपितछाविरहविरहविशिष्टपर्याप्तानुधावनेलिंगविशेषानुपरक्तानुमितीछाना
मपिनिरूद्धोत्तेजकत्वावच्छेदकाक्रांततयातादृशेछायांप्रतिबंधकत्वाप्रसक्तेः अन्यलिंगकेतिसंपातायांतत्सिद्धिविशेषछामा
त्रस्यप्रतिबंधकत्वेसिद्धिविशिष्टयत्तदनुमित्यादिगोचरेछाकालीनानुमित्यव्यक्तानांतत्तच्छक्तिप्रतिबंधकतावानांनिवेशनीय
तयामहागौरवमितिसाध्यविशिष्टपक्षविषयकप्रकारकानुमितीछातैवविशेष्यीभूतछानिवेशोवाच्यः वस्तुतस्तु

साध्यविशिष्टपक्षविषयकत्वादिप्रकारकत्वमप्यन्यलिंगकानुमितीच्छायांननिवेशनीयंघटादीच्छाकालीनाननुगतेच्छानांतन्म
तेपिसिध्यावुत्तेजकतायाःस्वीकारात्मन्मतेतुघटादीच्छासाधारण्यरूपेणैवानुमितीयाःउत्तेजकत्वोपगमादुक्तदोषस्यतुल्यत्वात्पक्ष
निर्वाहेणतादृशननुगतेच्छानामन्यलिंगकेच्छायामेवोत्तेजकत्वात्उत्तरचतादृशानुगुण्यार्थमवच्छिन्नाभावस्यलिंगत्वेदनुमितौकार
णतानोपक्षतोकारणतांतरस्यचकल्पनामपेक्ष्यलिंगसंदेनूतनलिंगकानुमितीच्छाविरहविशिष्टसिध्यितरूपलघुधर्मावच्छि
न्नाभावहेतुकताकल्पनस्यैवसाधुत्वेनपूर्वपक्षस्यैवसम्यक्त्वापत्तावाकारोऽनिष्टस्यस्यात्तिचेदुच्यते परेतु उक्तानुगतेच्छान्यलिंगक
तत्प्रकारकानुमितीच्छासमवहितसिध्यितरूपायांमाननुगतानुभवबलात्तलिंगकानुमित्युपपत्तयेसिध्योतादृशेच्छाभावकूटस्यैवनिवेश्य
निवेशनेपूर्वमतेगौरवमेतन्मतेचानुगतान्यलिंगकानुमितीयारूपेणोत्तेजकबलादेवतत्रानुमित्युपपत्तेःसिध्योतादृशेच्छाभावनिवे
शस्तुनचैतन्मतेऽन्यलिंगकानुमितीप्रतिबंधकतायामेवतासामुत्तेजकत्वस्यावश्यकतयासाम्यमितिवाच्यंतत्रापिननुगता
तानुमितीयासमकक्षतामूहालंबनरूपेणान्यलिंगकानुमितीयातत्रान्यलिंगकानुमितीयायोतादृशेच्छाव्यक्तिस्तेदाएवनिवेशनीयाःसिध्यो

तुसामानाधिकरण्यसंबंधेनतदसंताभावःतत्रचतत्तत्कालीनसंयोगादिव्यत्यभावानांनिवेशमादायविनिगम
तौविरहावकाशइतिवाच्यंसिध्यैरनंतरंयत्रसमूहालंबनेछाद्यक्षीनामुपन्यिस्तत्रतादृशसिध्यिभेदोनासिध्यैनिवेशेउछात्पत्तिका
लेअनुमित्यापत्तेश्चनेछयोर्युगपदुत्पादमतेउछासामग्यासानाविरोधिलातुयादृशसाध्यसिध्यिजननकालेप्रतिबंधकोतेजक
योरेकस्याःअपरस्यलक्ष्यतपूर्वमुत्पन्नित्तत्रद्वितीयक्षणेअनुमित्युपपत्तयेयेतन्मतेपितत्सिध्यिभेदाःअन्यलिंगकेछाविद्योष
णीभूतसिध्यैरनिवेश्यतेनतुअन्यलिंगकेछायांतन्निवेशनंसिध्यैवातहिछायंताभावःअतोनतत्कालीनसंयोगादिव्य
त्यभावनिवेशमादायविनिगमनाविरहप्रसंगइत्याहुःसाधकमानपक्षस्यसिध्यिकारणपरतेपूर्वोक्तदोषप्रसंगात्तद्याचष्टेसा
ध्यवतानिश्चयेतिसाध्यवतानिश्चयःप्रकृतसाध्यपक्षवैशिष्ट्यावगाहिनिश्चयःपाषाणमयोवह्निमान्पर्वतःतेजस्वीरूपाद्याकार
कसमानप्रकारकनिश्चयदशायांपर्वतोवह्निमानित्याद्याकारकानुमितेरनुभवसिध्यतयायथाश्रुत्यनुपपत्तेःप्रकारविशेषं
निवेशयतिपाषाणमयत्वादितितत्रपर्वतेतत्स्यवह्नेःधर्मितासाध्यवयोरुद्देश्यत्वविधेयत्वयोःअनुप्रवेशनीयाविद्यस्यपक्षतारा
रीरेत्यादितथाचपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितसंयोगादिसंसर्गोवच्छिन्नवह्नित्वाद्यवच्छिन्नविधेयताकानुमितिंप्रतितदू

पावच्छिन्नविशेष्यतानिरूपिततत्संसर्गावच्छिन्नतत्तधर्मावच्छिन्नप्रकारतानिश्चयत्वावच्छिन्नस्यसिसाधयिषाविरहविशिष्ट
स्याभावोहेतुरितिपर्यवसितंपर्वतोवह्निमानित्यादिसिध्यिदृशायांवह्निमान्पर्वतोघटवानित्याद्यनुमितिर्दुरापास्तावच्छेदकप्रकारतानुपस्थितौविधेयतानिवेशनेविधेयतायांवह्निमनुमिनोमीत्याद्यनुव्यवसायनियामकपक्षतावच्छेदकव्यावृत्तो
विषयतानिरूपितःस्वरूपतःपर्वतत्वादिप्रकारकसिध्यिदृशायांजातिमान्वह्निमान्पर्वतोजातिमद्वह्नियाद्यनुमितिर्दुरुपपा
दैतत्वंवह्नित्वादिप्रकारकसिध्यिदृशायांअधिकविषयतायाःसंदेहपर्वतोवह्निमान्पर्वतःसंदेहत्वंवह्निमानित्याद्यनुमितेरुपपा
प्रतिबध्यदिशिपर्वतत्वाद्यवच्छिन्नेत्यादिनाकिंचिद्विशेषितपर्वतत्वादिपर्याप्तावच्छेदकतोक्तमेवविवक्षणीयंतदर्थंचपर्वत
त्वादिनिष्ठनिरवच्छिन्नावच्छेदकाश्रिन्नावच्छेदकतानिरूपकत्वंतेनजातिमान्पर्वतोवह्निमान्पर्वतोजातिमद्वह्निमानित्यनुमि
तेर्नानुपपत्तिः।पर्वतोवह्निमानित्यनुमितौजातिमान्वह्निमान्पर्वतोजातिमद्वह्नियादिसिध्येरप्रतिबंधकतयाप्रतिबंधकदि
श्यपिपर्वतत्वाद्यवच्छिन्नेत्यादिनाकिंचिद्विशेषिततत्त्वावच्छिन्नत्वमेवविवक्षणीयंतदर्थंचनिरवच्छिन्नतद्धर्मावच्छेदकतावा
न्मितिध्येयेनानुपपत्तावच्छिन्नविशेष्यताकानुमितौपर्वतत्वावच्छिन्नविशेष्यताकसिध्येःप्रतिबंधकत्वेपर्वतत्वेनैवोप

पर्वतविशेष्यकसिद्धसाध्यांतेनरूपेणान्यपर्वतेपि ——साध्यानुमितिनुदयापत्तिरतआह यदिचेति पर्वतत्वावच्छे
दकतावगाहियत्किंचिद्धर्म्मिविशेष्यकसिद्धसाध्यांतेनरूपेणधर्म्मांतरेअनुमितिनुसादंस्यनिर्विवादतयासामानाधिकर
ण्येनेति एकत्रैककर्मणिजनुमित्यासत्तेविशेषणाभावादेवविशिष्टाभावनिर्वाहात्धर्म्मिविशेषनिवेशानमफलंजनतोविनाप्य
नुमित्सामितिजन्यत्रजन्यधर्म्मिजिधर्म्मिविशेषानंतर्भावेपिवह्न्याश्रयसासामानाधिकरण्यनसिद्धसाध्यांशवच्छेदकावच्छेद
नानुमितौबाधकाभावात्तादृशेति सामानाधिकरण्यमात्रावगाहीत्यर्थः धर्म्मिविशेषोपीतितथाचपर्वतत्वावच्छिन्नतत्पर्वतो
द्देश्यकानुमितौपर्वतत्वावच्छिन्नतत्पर्वतादिविशिष्यकसाध्यवत्तानिश्चयत्वेनप्रतिबंधकत्वंकल्प्यतइतिभावः अन्यथात
दानींतादृशानुमितेरानुभाविकत्वविरहे——धर्म्मविशेषानिवेश्यइत्यनुषज्यते अनुमितिर्द्विविधापक्षतावच्छेदकसाध्ययोः
सामानाधिकरण्यमात्रावगाहीतयोरवच्छेद्यावच्छेदकभावावगाहिनीच अवच्छेद्यावच्छेदकभावोपिकश्चित्संबंधवि

५ (ग)पृथिवीत्वरूपवतीतिप्रतीतिप्रमापत्तिस्तु प्रकारप्रतियोगिकत्वविशिष्टसमवायत्वादिनावारणीया॥३)५

शेषःयथामूलावछिन्नोवृक्षःसंयोगीयादौमूलावछिन्नसंयोगाथीस्तत्रान्य यदुर्वचत्वातूतदवगाहिन्यामवचानुमितौपक्षतावछे
२२ दकदंडाकालावछेदनबाधग्रहस्यविरोधितयाबाधस्यासिध्यभिचारासंकरमणिकत्वव्यवस्थापयिष्यतिकश्चिच्चव्याप्यव्या
पकभावः यथापृथिवीरूपवतीयादौपृथिवीत्वादिरूपाथीतत्रपक्षतावछेदकस्यसाध्यतावछेदकधर्मिपारतंत्र्येणावछिन्नतंसंबंधविधया प्रकारस्य
भासतेअतोऽवछेदकावछेदनानुमितेर्नपर्वतोऽथवछिन्नवह्निमान्पर्वतइत्याकारकताऽथवापक्षतासंबंधतयाभासमानसाध्य
संबंधसंबंधतावछेदकतयापक्षतावछेदकावछिन्नत्वमानं [illegible]तावछेदकावछिन्नत्वविशिष्टसाध्यीयतेनवापक्षतासंबंधभानमियन्य
त्रविवेचितंअवछेदकावछेदनानुमितिश्चरसामानाधिकरण्यमात्रविषयकसिध्यदवस्थायामपिजा[illegible]न्नविषयकसिध्यदवस्थायामधि
कविषयकानुमितेःसर्वानुभवसिद्धत्वातूअतएवयत्रावछेदकावछेदनानुमितिरुद्देश्यातत्रनाऽऽश्रयतःसिध्यसाधनंदोषः मणिकृतेवप
थिव्यामितरभेदानुमानेऽसंप्रतिपत्तिसिध्यसाधनमाशंक्यसर्वापृथिवीइतरभिन्नेयुद्देश्यप्रतीतेरभावातूपक्षतावछेदकनानात्वहित

दितिसमाधानस्य वक्ष्यमाणत्वात् । दियतत्वादेवोपपादयति पक्षतावच्छेदकत्वेतिसामानाधिकरण्येनसामानाधिकरण्यमात्रेण तद्वच्छेदेनपक्षतावच्छेदकावच्छेदेन सिध्येः सिध्येरेवसामानाधिकरण्यमात्रावगाहिसाध्यप्रतिबंधकत्वमेवकार्य्यव्यवच्छेद्यं जयंतभावः पर्वतोवह्निमानित्यादेसिध्यिदशायांपर्वतःसुंदरोवह्निमानित्याधनुमित्युत्तरंविधेयतावच्छेदकतायाःपर्याप्तिः प्रतिबध्यतावच्छेदककोटौनिवेशनीया एवंसंयोगादिनावह्नेः सिध्यावपिसंयोगादिनावह्निमानित्यनुमित्युत्तरंसंसर्गतायाअपिपर्याप्तिर्निवेशनीया एवंसंयोगादिनासाध्यस्यदंडोपलक्षितपुरुषादेः सिध्यावपिविशिष्यनिरूपितसंयोगादिनादंडिपुरुषोधनुमित्युत्तरंसाध्यावच्छेदकतायाःपर्याप्तिर्निवेश्या एवंचउक्तावच्छेदकावच्छेदेनानुमितोद्यंधवह्निमान्दोद्यंधसंयोगवान्दोवाविधेयतावच्छेदकतायाःसंसर्गतावच्छेदकतायावाऽपेपर्याप्तेरनुभवादनुमितेर्नसामानाधिकरण्येमात्रावगाहित्वंसिध्यप्रतिबंधकत्वमिति प्राचस्तुव्याप्यकतायाःसंसर्गतयाभाने मानाभावोपक्षतावच्छेदकावच्छेदेनसाध्यकिंविषयकानुमितेरेवपक्षतावच्छेदकावच्छेदेनानुमितिरितिवदंतिनव्यमतमणिकारास्तुन्यायेनाशंक्यसिध्यसाधनस्यानुगततत्तत्पदावच्छिन्नानाव्यक्तिपक्षकानुमितावदोषत्वेपक्षतावच्छेदकावच्छेदेनसाध्यकिंविषयकानुमितेरेवसिध्यिसामान्यप्रतिबध्यतावच्छेदककोटौनिवेशनीयंनचविषयतयाभेदानुपक्षतावच्छेदकावच्छे

२८

देनानुमितेर्विषयतानामपि नानाव्यक्तिपक्षकस्य हे पक्षतावच्छेदकाव्यापकत्वमेवेति तत्रपक्षतावच्छेदकव्यापकोद्देश्यतायाः अप्रसिद्धेरिति वाच्यं
उद्देश्यतासंबंधेन पक्षतावच्छेदकव्यापकान्यतरस्यैवानुमितिविशेषणांतरनोपगमेन निर्वाहात् दीधितिकारस्यतु अवच्छेदकावच्छेदेनानुमितावच्छेद्या
वच्छेदकतावच्छेदकसंबंधस्यैवव्याप्यव्यापकभावरूपस्यापिज्ञानमनुमतीच्छाप्रयोजकसिद्धेर्दोषत्वनिर्वाहार्थं पक्षतावच्छेदकावच्छेदेनानुमितौपक्षता
वच्छेदकावच्छेदेनहेतुमत्ताज्ञानकारणतायाः आवश्यकत्वात् शिखरविशिष्टःपर्वतोवह्निमान्निसादौशिखरेहेतुमत्त्वसंबंधस्यवावच्छेदकतावि
रहेण हेतुसिद्धेरावश्यकतयाव्याप्यपक्षतावच्छेदकातिरिक्तवृत्तित्वरूपावच्छेदकतावगाहिन्यामनुमितौतदवच्छेदेनहेतुमत्ताज्ञानस्यहेतुतायाः
प्रयोजकसिद्धेर्दोषतार्थमुपगमेपिस्वरूपसंबंधरूपावच्छेदकतावगाहिन्यामनुमितौपक्षतावच्छेदकावच्छेदनहेतुमत्ताज्ञानापेक्षा नोपपद्यतेइति
समाधानस्यस्वयमवच्छेदकत्वयोर्विरुद्धत्वात् नार्वाचीनादित्यनेनाग्रेवक्ष्यमाणत्वात् एवंव्यापकत्वज्ञानस्यतदनुमतौपर्वतत्वसामानाधिकरण्येनैक
त्रैयत्रैकत्रसाध्यसिद्धाविच्छेदेनैवावच्छेदकावच्छेदेनव्याप्तिग्रहस्तदवगाहिन्यांतल्लाघवप्रयोजकस्यसामानाधिकरण्येनैत्युपादानस्यानर्थक्या
च्चयुज्यतेच्चतदेवमतंप्राचीनमतेपिउक्तयुक्त्याविधेयतावच्छेदकतादिपर्याप्तिनिवेशस्यावश्यकत्वात् तादृशउद्देश्यतात्वान्यतरस्याधिकरण्यनिवेशानी
यतायागौरवात् एवंसिद्धिसामान्यस्वरूपान्यदृशायांअवच्छेदकावच्छेदेनानुमितौवुत्पद्यमानायांसिद्ध्यभावबलात्तत्कार्यतावच्छेदकीभूतपक्षतावच्छे

दकव्यापकोद्देश्यतानिरूपितान्यानुमितित्वावच्छिन्नस्यापत्तेश्च अस्मन्मते-यसिद्धिसामान्याभावकालीनावच्छेदकावच्छेदेनानुमितौविशिष्टवह्नित्वेविशि
ष्टसंयोगहेत्वोपर्याप्तिविषयतावच्छेदकविशेषस्वरूपसंबन्धेवह्नित्वेवह्निसंयोगसंबन्धेवापर्याप्तिरपिविषयतावच्छेदकविशेषःस्वीक्रियते एकस्यानस्यैकविषयेविषय
तादृशोपगमेऽपितिविरहादितिसिद्धिसामान्याभावकार्यतावच्छेदकावच्छिन्नोपनिरिष्टेवनचावच्छेदकावच्छेदेनानुमितौव्यापकतायाःसंसर्ग
तयाभानोपगमेतादृशानुमिताववच्छेदकावच्छेदनहेतुमत्ताज्ञानस्यपृथक्कारणताकल्पनौरवं एतन्मतेतत्तत्सर्वतोद्देश्यकानुमितौतत्तत्स
र्वतोविशेष्यकपरामर्शस्यहेतुतयाऽर्थवत्त्वादेवयावत्सर्वतोविषयकोपरामर्शस्तथाविधानुमितेरुपादानात्तादृशानुमितौपरामर्शस्यस्वतन्त्र
हेतुत्वाकल्पनाद्व्यापकतायाःसंसर्गविधयाज्ञानस्यक्वचिदप्यनभ्युपगमादितिवाच्यंयत्रैकपरामर्शःकतिपयपर्वतविषयकःअन्य
श्चतादितरयावत्सर्वतविषयकस्तत्रापिअवच्छेदकावच्छेदेनानुमितेरुपादापत्तेःनचेष्टापत्तिःअवच्छेदकावच्छेदेनहेतुमत्ताज्ञानंविनाअवच्छेदको
वच्छेदेनानुमित्यनुपादयसर्वसिद्धान्तेतत्रकस्यापिपरामर्शस्यसत्त्वान्मतसिद्धायाअवच्छेदकावच्छेदेनहेतुमत्तावगाहिताया अस्तंभावा
त्तुल्यंयत्रयत्रपक्षतावच्छेदकताघटकसंबन्धेनपक्षतावच्छेदकवृत्तितत्तेनसंबन्धेनपक्षतावच्छेदकाक्रान्तासिध्याअनुमितिहेविध्यानुप
पत्तिश्चेत्तन्मते व्याप्तिभावच्छेदकावच्छेदेनानुमित्याअवच्छेद्यावच्छेदकतावत्स्वरूपाधिकविषयतानवगाहेनज्ञानाधिकरण्यमात्रेणसि

२८

धिदृग्यांनादृग्यनुमित्युपनीतीत्यभावः सिध्यविषयीकृतधर्मिविषयकस्यतद्वीजत्वेतथाविधसिध्यदृग्यांकतिपयपर्वतादिविषयका
नुमितेरप्युपादो[illegible]चित्यात्तस्मादवच्छेद्यावच्छेदकभावावगाहिज्ञानमेवावच्छेदकावच्छेदेनज्ञानमित्युच्यतइति अथमणिकृताप[illegible]तावच्छ
देकैक्येनव्याप्तिः सिध्यसाधनस्यअदोषत्वोपगमेतदितरप्राचीनेरनुमितिमात्रेणव्याप्तिः सिध्यसाधनस्यापिदोषत्वमुपयातेअतएवतेषांम
तमवलंब्यमणिकृतापिपक्षतावच्छेदकस्यपृथिव्यादेरित्यत्वाध्यनुमानेधूमन्यादावव्याप्तिः सिध्यसाधनवारणायवह्न्यादिविशेषणंपक्षनिवेशितंअ
तएवगंधादिरूपपक्षतावच्छेदकस्यपृथिव्यामितरभेदादोसाध्यहेतुतानाचार्यैरनुमन्यतव्याप्यग्रहएवहेतुरूपपक्षतावच्छेदकसा
ध्ययोःसामानाधिकरण्यभानेनसिध्यसाधनासक्तेपृथिवीविषयकानुमितेरयोगात्नचाव्याप्तिःसाध्यसिध्यावप्यधिकधर्मिविषय
कतयावपर्वतादिविषयकानुमित्युपादेऽचितः अधिकधर्मिविषयकानुमितेःसिध्यदृग्याअनुपादेचवागनियेत्यादिसिध्यदृग्याः
अनियेवाइत्यनरसेइत्यादिसमूहालंबनानुमित्युपादस्यौचित्यान्नहितत्करण्याप्यनुमितिःनवीनैरपिपक्षतावच्छेदकैक्यएवोक्तातःसि
ध्यसाधनस्यअदोषत्वोपगमात्तूएवंचनवीनमतएवअवच्छेदकावच्छिन्नज्ञानग्रहेतदनवगाहिज्ञानुमितिभेदेनपक्षताभेदस्यस्वीकरणी
यतयागौरवंनचविशिष्टबुद्धौधर्मितावच्छेदकव्यापकत्वज्ञानानुपगमेपक्षतावच्छेदक[illegible]सामानाधिकरण्यमात्रावगाहिबाधदृग्यांतत्ता

मानाधिकरण्यनात्तद्बाधविषयधर्मिविषयिण्याः कतिपयधर्मिविशेष्यकानुमितेरिवसकलधर्मिविषयकानुमितेरप्युपा
दौचित्यादवच्छेदकावच्छेदेनानुमितावुद्देश्यायामप्येतेनाबाधस्यादोषतापत्तिरितिवाच्यंसामानाधिकरण्यमात्रावगाहिन्यांबु
द्धौसमानविषयकतथाविधविपरीतनिश्चयप्रतिबंधकतायाः प्राचामनुमततयाऽनेनाबाधस्यदोषतोपपत्तेः एवंचयावत्पक्ष
विषयकानुमितौयावत्पक्षविषयकहेतुमत्ताज्ञानापेक्षायांतद्विरोधितयाभागासिद्धेरपिदोषतानिर्वाहः एवंयत्रसकलपर्वतो
नानेकपरामर्शविषयतासंपितुपरामर्शद्वयविषयतातत्रयावत्पर्वतविषयकानुमितिरूपावच्छेदकावच्छेदेनानुमितिः प्राचीनमते
इष्टैवनवीनमतेपितत्रतादृशानुमितेरावश्यकत्वादितिऽवच्छेदकावच्छेदेनानुमितौतादृशपरामर्शस्यैहेतुत्वाकल्पनेनापिनव्यमते
लाघवंमेवंऽवच्छेदकावच्छेदनविशिष्टबुद्धेव्यापकत्वमानानुपगमेव्यापकत्वज्ञानस्यसामानाधिकरण्यनविपरीतज्ञानप्र
तिबंधकत्वप्रयोजकत्वासंभवनतत्प्रयोजकतयदुर्वचतापत्तेः नचैकरूपेणसमानधर्मिविषयकत्वमेवविपरीतज्ञानप्रति
बंधकबीजंतथासतिपार्थिवगंधत्वाद्यवच्छेदनजलवृत्तित्वादिनिश्चयस्यापिप्रमुषगंधत्वाद्यवच्छेदनतन्निश्चयस्यवगं
धोजलवृत्तिर्नवेत्यादौगंधत्वादिनासामानाधिकरण्यमात्रेणजलवृत्तित्वादिसंशयविरोधितापत्तिसंभवात्उभयोरवनिश्चय
योर्गंधत्वादिनातदाश्रयावधर्मिणोभासावावगाहितयाऽविरोधात्विरोधिविषयकत्वादिविशेषधर्मितावच्छेदक

२द्वितीयस्यविरोधितेप्रथमस्यापितथात्वौचित्यात्२

का१

कोटीऽधिकभानस्य विरोधितावीजाभावात्नव्यनयऽभयनिश्चयेव्यापकतयाधर्मेदनविरोधसंभवात्एतनावच्छेदकावच्छेद
२९ नानुमितौव्यापकज्ञानापेक्षयालाघवात्यावद्धर्मेऽनुगमेऽविषयताभ्युपगमएवोचितः तदन्यविषयतेवसिद्धि
सामान्यप्रतिबध्यतावच्छेदकसिद्धिसामान्याभावकालीनानुमितौचतादृशैकैकधर्मवत्तिविषयताऽपीष्यंतइति
नदोषिदोषइतिपरास्तपक्षतावच्छेदकसामानाधिकरण्यादिसिद्धिदशायांसामानाधिकरण्यमात्राव
गाहिन्यनुमितिर्नजायतेऽन्यथेवसिध्यापक्षतावच्छेदकवत्तिसाध्यसंबंधरूपतदंशयसामानाधिकरण्यावगाहित
यातादृशानुमितेस्तदतिरिक्तानवगाहित्वात्अतस्तथाविधानुमितावुभयोर्विधिसिध्योरवप्रतिबंधकत्वंदर्शयति।
तत्सामानाधिकरण्येनेतितत्सामानाधिकरण्यमात्रेणपक्षतावच्छेदकमात्रेणाऽवच्छेदकावच्छेदानुमितिरपिसामाना सामानाधिक
धिकरण्यावगाहितयातथ्यावर्तनायावच्छेद्यावच्छेदकभावावगाहित्वस्यव्यवच्छेदार्थकंमात्रपदंअवच्छेद्यावच्छेदकभावान रण्य
वगाहिबंचनसिध्यभावजन्यतावच्छेदककोटौनिवेशनीयंउक्तदिशायत्तिर्संभवासर्वत्रनिवेशादेवापपत्तेर्वैयर्थ्याच्चेत्यवध
येसिद्धिमात्रस्थितिमात्रपदंफलत्वार्थकंतथाचपक्षतावच्छेदकसामानाधिकरण्येनतदवच्छेदकवत्तिसाध्यनिरूपितबाधप्रतिबंधकतयो

पत्यविधिसिध्योः संसर्गतादीनां पर्याप्तिमनिवेश्यैकरूपेणैव यथोभयसाधारणनिश्चयवंत्राक्यते निर्वक्तुमन्यथा पृथक्पृथगेवेति
ध्येयं यत्तु सामानाधिकरण्येनानुमितौ तथाबैधसिध्येरवच्छेदकावच्छेदेनसिध्यावच्छेदकरूपेणाप्रतिबंधकतेपि तत्रावच्छेदकावच्छे
देनसिध्येन्नप्रतिबंधकताधिक्यं लघवच्छेदकावच्छेदेनानुमितौ तस्याः प्रतिबंधकतैकल्पनीयलघवच्छिन्नसंयोगादिपर्याप्तसंसर्गता
कतस्यप्रतिबध्यतावच्छेदकलघवर्थं निवेशनीयतयालघवच्छिन्नताधतिरिक्तधर्मानवच्छिन्नसंयोगादिनिष्ठसंसर्गितावच्छेदकतस्यैव
चतदर्थतयानुभवसंयोगादिसंसर्गकानुमितिसाधारण्येनतादृशप्रतिबंधकतयैवोपपत्तेरितितदसत्सामानाधिकरण्येनानु
मितुयामवच्छेदकावच्छेदेनानुमितुयामित्याधाकारकेछानांपृथक्पृथगुत्तेजकतायावश्यमाधातया पृथक्प्रतिबंधकताकल्पनव्यथा
वत्रयकल्पनेनसिध्यदग्नौ पक्षतावच्छेदकावच्छेदेनानुमितिर्जायतामिसाकारकसिषाधयिषारहेऽसतिचावच्छेदकावच्छेदकाव
च्छेदनहेतुमत्तापरामर्शसामानाधिकरण्यमात्रावगाहिपरामर्शतादृशानुमितेरापत्तिः तादृशसिषाधयिषारहेनपक्षतायां
पक्षतादिघटितोदृशंचेतिदृशंचोक्तयुक्त्या पक्षतावच्छेदकावच्छिन्नतत्तत्सामानाधिकरण्यमात्रावगाहिनानुमितेयोः सिध्येः
पृथक्पृथक्प्रतिबंधकत्वेचसर्वथैः लिंगभेदन्यायइति यथाचतत्तल्लिंगकानुमितौसिध्येः प्रतिबंधकतायांतत्तल्लिंगकानु
मितीछेवोत्तेजकानतत्तल्लिंगकानुमितीछा तथापक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहिनीमनुमितिंप्रतिसिध्येः प्रति

बंधकता[redacted] यौं तादृग्नानुमितीच्छैवोत्तेजकानन्यविधानुमितीच्छेतिस्वीकर्तव्यमितिनातिप्रसंगइत्यर्थः यदिपर्वतेवन्हिरित्याकारक
निश्चयानंतरं पर्वतोवन्हिमानित्याधाकारकानुमितिर्जायते तदासाध्यविशेष्यकानुमितौसाध्यविशेष्यकसिद्धेःप्रतिबंधकत्वपि
सामान्यतःसाध्यपक्षेवैशिष्ट्यावगाहिनुमितौतादृग्सिद्धिजननेकप्रतिबंधकत्वंकल्पनीयंतथापितुविशिष्येव प्रतिबंधकत्वाद्द
यंजगत्सागौरवस्यादोषत्वादित्याशयेनाह साध्यविशेष्यकानुमित्योः समानविषयकत्वेविशेष्यविशेषणभावःपरीक्षकैरेवनिर्णे
तव्यमित्यभिप्रायेणनिर्भरेत्यादिग्रंथेनाप्रामाणिकत्वंदूषणकारस्यतुसमानप्रकारकसिद्धेरेवप्रतिबंधकत्वमनुमतंपथि
व्याभितरपक्षेदइतिसाध्यविशेष्यकानुमितेरनंतरं तदासकविशेषणतानसहकृतात् व्यतिरेकपरामर्शादेवपक्षेवीतरागं
नेतिपक्षविशेष्यकानुमितेरुदयेतेनव्यतिरेकिग्रंथेयश्यमाणात्पक्षविशेष्यकेवेति तथाचविशिष्य कारतावि
शेषनिवेश्येवप्रतिबध्यप्रतिबंधकभावःकल्पनीयइतिभावः तत्रतादृग्नानुमित्यभावस्यप्रामाणिकत्वात्तदभाव विधतानसा
धारणपक्षसाध्यवैशिष्ट्यावगाहिनिश्चयत्वस्यानतिप्रसक्तस्यसुवचत्वेनोभयविधसिद्धेरनुगतरूपेणैव प्रतिबंधकताप्र
तिबध्यतावच्छेदकानुपक्षविशेष्यकसाध्यप्रकारकानुमितित्वादिकमेवनत्वनुगतंपक्षमित्रविशेष्यकसाध्यप्रकारकानुमिति

र्जीयतांसाध्यविशेष्यकपक्षप्रकारकानुमितिर्जीयतांइत्यादिकयोरिच्छयोः पृथक्पृथगुच्चैरुक्तानुरोधात् एवंचसाध्यविशेष्यकसि
ध्यनंतरं पक्षविशेष्यकानुमित्युत्पत्तेः प्रामाणिकत्वंचतुल्यन्यायादितिपर्यवसानादियंतस्यहेतुः सामान्याकारकसिध्सिरितिउ
न्यूनाकारकसिध्सिरित्यर्थः पर्वतोसंदरवन्हिमानित्यादिसिध्सरणायामपिन्यूनविषयिण्याःपर्वतोवन्हिमानित्यनुमितेर
नुपोदाधिकविषयकसिध्सरविरोधित्वंचावच्छेदकावच्छेदेनसिद्धेःसामानाधिकरण्येनानुमितौप्रतिबंधकतालिरवन
स्यासंगतेः अतएवजातिन्नाक्तिर्वादेगोत्वेनगोवृत्तिरित्यनुमानंसिध्सरसाधनान्नसंभवतिजातिविशिष्टेहेतुनाचेविशिष्टसाध्यसा
धनएवसिध्सरसाधनात्काश्चेनानुविशिष्टेनाविशिष्टसाधनोपीतिजात्याव्यस्यनुमानपक्षमाक्षिप्यमिश्राःअथपिसावातसि
धिरितिमूलमवतारयामासुः ननुसाध्यविशेष्यकानुमितिःसर्वत्रनानुभवसिध्पर्वतोवन्हिमानित्याकारकानुमितेरवानु
भवानुव्याप्यविशेष्यकपरामर्शादिपक्षविशेष्यकानुमित्युपादस्यपरामर्शद्वयस्यानुगतरूपेणहेतुतावादिनोपिस
मानंतत्तुकिंलक्षणसिध्सरसाध्यकरुढेविशेषणज्ञानादिविरहेपिसाध्यविशेषणकानुमितेरनुपपत्तेःसाध्यविशेष्य
कानुमितिरपेयंतएवंचपक्षविशेष्यकसिध्दशायामपितादृशानुमितेरप्रामाणिकतयातदभ्युपगमेक्षतिरि

३१

हानुत्तंप्रतियोग्यपक्षवैशिष्ट्यावगाहिज्ञानत्वेनोभयविधसिद्धिसाधारण्येनापि प्रतिबंधकत्वसंभवतीत्यभिप्रेयमतां
तरमाह तादृशज्ञानानुमितिप्रतिबंधकसाध्यविशेष्यकानुमितिमित्यर्थः सिद्धिमात्रपक्षविशेष्यकसाध्यविशेष्यकाच्चसिद्धि
रित्यर्थः ननु धूमवत्वसाध्यज्ञानदशायामपि वह्निसाध्यविशेष्यकानुमितेरप्रामाणिकीतत्रसाध्यविशेष्यकानुमितेरव
श्यंभवादितिचेन्न तादृशानुमितिप्रतिबंधकीयोपक्षतादिविषयतायाः सिषाधयिषाविरहस्यनिश्चयस्यचनिवेशनंगीकृत्य
येनसिसंधायाह साध्यप्रसिद्धिरितिसाध्यतावच्छेदकप्रकारकज्ञानमित्यर्थः तेनेतरत्व व्यापकीभूतभावप्रतियो
गिपृथिवीत्ववतीपृथिवीत्यादि [redacted] देवादिनासाध्यज्ञानसंवेपृथिव्यामितरभेद इसाकारका
नुमितेर्नानुपपत्तिः नचतत्रपृथिवीतरभिन्नेयंतादृशानुमितेः संभवः विशेषणतावच्छेदकीभूततरभेदादिप्रकारकज्ञानवि
रहात्तथाहितरभेदादिप्रकारकज्ञानस्ययदीतरभेदत्वावच्छिन्नमुख्यविशेष्यकानुमितिज्ञानंप्रतिबध्यतावच्छेदकंतदात
थाविधज्ञानदशायामितरभेदादिपक्षकप्रमेयत्वसाधनुमितेरप्यनुपपत्तिः तथर्मावच्छिन्नविधेयकतत्साधिकरण्यनिवेशेपी
तरभेदः प्रमेयः पृथिवीतरभिन्नेयादिसमूहालंबनानुमितेर्गोत्वाभावोगोत्वाभाव वानित्यसाधनुमितेर्नुपपत्तिः [redacted] तेभ्या

तूपाधीतरभिन्नेत्यादिसाध्यविशेषणकानुमितौ तथाविधप्रत्यक्षादिसाधारणीविशेष्यतावच्छेदकताभिन्ना मुख्यविशेष्यतानिरूपित
प्रकारतैवविधेयतासाध्यविशेष्यकानुमितौचतत्तान्यातथाविधप्रकारताभिन्नविधेयतैवसाध्यप्रसिद्धिप्रतिबध्यतावच्छेदिकेतिना
नुपपत्तिरितिचेन्न प्रकारताविशेषस्यविधेयतात्वेापगमेजलभेदत्वेजलभेदत्वसाकारकत्वेजलभेदादिसाध्यविशेष्यकानुमितिजल
भेदादिविधेयकत्वापातात् नच आधेयतासंबंधावच्छिन्नप्रकारताश्रयवृत्तित्वंतदितिवाच्यं तथासतिसाधेयतासंबंधेनजलभेदादिसा
ध्यकतादृशानुमितेरपितद्विधेयकत्वानुपपत्तेः यदिविधेयत्वंसाध्यतावच्छेदकसंबंधःतत्रविधेयत्वमतिरिक्तमित्युच्यतेतदातत्सं
बंधेनजलभेदादिसाध्यकानुमितौप्रकारताभिन्नविधेयतायाअलिन्यांसाध्यप्रसिद्ध्यभावव्याप्तिचारोदुरुद्धरः वह्नयुत्पत्तौ तथर्मावि
च्छिन्नप्रकारकत्वेसतितद्धर्मविच्छिन्नविधेयकानुमितित्वमेवतद्धर्मप्रकारकज्ञानप्रतिबध्यतावच्छेदकसाध्यप्रसिद्धेस्थलेसाध्य
प्रकारिकेवानुमितिर्जायेत नतुतदप्रकारिकेतिनतत्रव्याप्तिचारः अतएवसाध्यविधेयकानुमितौसाध्यप्रसिद्धेःप्रतिबंधक
त्वादेव प्रसिद्धसाध्यकस्थले अभावरूपसाध्यप्रसिद्धिरस्थले नतुभावसाध्यकस्थलइत्यर्थः तत्रपरामर्शनियमतःसाध्य
घटितव्याप्तिविषयकतयासाध्यविशेष्यकानुमितेरप्रसिद्धोसाध्यप्रसिद्धिप्रतिबंधकतायाः कल्पइतुमत्रावश्यत्वादुपक्षयक
त्वासंगतेः स्वनिरूपितप्रकारतानवच्छेदकत्वविशिष्टविधेयतावच्छेदकतापर्यायेधर्मस्वरूपविषयनिष्ठप्रसिद्ध्यासत्त्वेअनुमितिं

३२

प्रतिविषयतावच्छेदकतासंबंधेनज्ञानस्यसर्वसाधारण्येनप्रतिबंधकतायाःआपाततःउक्तिसंभवेपिसाध्याघटकव्यतिरेकव्याप्तिविषयकपरा
मर्शघटितसामग्र्याएवसाध्यविशेष्यकत्वदुमित्युत्पादप्रयोजकतायाःदुर्वचत्वात्तुभावसाध्यकस्थलेसाध्यविशेष्यकानुमितेरप्रसिद्ध्याऽननु
मितेःसाध्यविशेष्यकत्वतादृशप्रतिबंधकतायाःउक्तप्रयोजकत्वादुपपत्तेःसंगतितादवस्थ्यात्तुयत्रमहानसीयवह्निमात्रविषयकः
परामर्शस्तत्रपक्षधर्मतावलात्पर्वतेपर्वतीयवह्नेर्महानसीयवह्निसमानोविशेषणत्वेनविशेष्यतयैवभासतइतिभावसाध्यकस्थलेपिसा
ध्यविशेष्यकानुमितिसंभवइतितत्रोक्तसामान्यलक्षणायाःप्रयासस्तित्वमतेमहानसीयवह्निविषयकपरामर्शेपर्वतीयवह्नेर्भानेप्रयो
जकस्यदुर्लभत्वात्तन्यरूपणमकरणात्रैकदाचिद्बोधकविरहात्तदभानसंभवेऽप्युद्बोधकस्यफलबलकल्प्यत्वात्तुविशिष्टविशे
षणकबुद्धौविशेषणज्ञानहेतुतायाःनियुक्तिकत्वात्तुविशेषणतावच्छेदकप्रकारकज्ञानस्यचाक्षुषत्वात्तुपर्वतीयवह्निविषयकपरामर्शे
दीपवह्नित्वेनतद्वह्निविशेषणकानुमितिसंभवाच्चदृष्टमात्रविषयंसाध्यप्रसिद्धिप्रतिबंधकतायामपिसाध्यविशेष्यकानुमितिप्रति
कारकत्वायाउक्तोजकत्वमावश्यकंतस्याथापन्नविशेष्यकसिद्धज्ञायांतादृशोजस्केसाध्यविशेष्यकानुमितेरपत्त्यापत्तेःसिध्यस
मवहितसाध्यप्रसिद्धेदृष्टायांसाध्यविशेष्यकानुमितेःस्वभावेनतत्रैवोदयसंशयनिवृत्यादिसंभवेसाध्यविशेष्यकानुमि
त्यनुपगमेपिनक्षतिकरइत्यभिसंधायैवसाध्यप्रसिद्धेस्तादृशीमुररीकृतिग्रंथकृता।अकृतेचसाध्यविशेषणकानुमित्युप्त

दासंभवेन तादृशानुमित्यपलापानौचित्यात्तथाचयत्रसिध्यसंभवहितासाध्यप्रसिधिरथ-थानुमितातत्रव्यतिरेकिपरामर्शीसाध्यविशि
ष्यिकातद्विशेषणिकाचानुमितिरापाद्येतनचैकविधोदेवपरामर्शदेकदाहविधानुमितिरानुभविकीतस्माध्वतिरेकिमरामर्शीसाध्यप्र
सिधिदशायामपिसाध्यविशेष्यिकाएवानुमितेरुपादः समुचितःसिधिप्रतिबंधकतापक्षयासाध्यप्रसिधिप्रतिबंधकतायोमवपे
दकलाघवमप्यकिंचित्करमवव्यतिरेकिपरामर्शीकाचिसाध्यविशेषणकानुमितिस्वीकारेतादृशानुमितिंप्रतिव्यतिरेकिलिंगत्वान्व
यिलिंगत्वादिप्रकारकानुमितांपृथक्पृथगुत्पत्तिकल्पनेसिधेःप्रतिबंधकतादृयनेवगौरवानुपेरलुप्तप्रसिधसाध्यकस्यलोपिसाध्य
विशेषणिकैवानुमितिर्जायतेइतरभेदत्वादिरूपविशेषणतावच्छेदकप्रकारकज्ञानविरहेपिविशेष्यविशेषणंतत्रचविशेषणांतर
मितिन्यायेनैवपृथिवीइतरभिन्नत्वेसाधनुमितिसंभवातुनचलाघवानवकाशाःतादृशानुमितिंप्रत्येवसाध्यप्रसिधिप्रतिबंधकता
या यासत्रयंकल्पनीयत्वादितिवाच्यंतथाविधानुमितौतादृशीविषयतातस्याःसाध्यप्रसिधिकालीनविशिष्टवैशिष्ट्यावगाहनुमि
तिसाधारण्यायगमात्साध्यविशेष्यकानुमितेरनुपगमसाध्यप्रसिधिप्रतिबंधकताएवाकल्पनातुनचसिधिकालेतथाविधानुमि
तेर्वारणायतत्रसिधेःसाध्यप्रसिधेर्वाप्रतिबंधकत्वकल्पनमावश्यकंमितिवाच्यंविशिष्टवैशिष्ट्यावगाहनुमितिरस्वीय
सिधिप्रतिबंधकत्वेबोपपत्तेःइतरभेदत्वादिनाइतरभेदविधेयकानुमितेस्तस्यातस्यास्वीयप्रतिबध्यतावच्छेदकस्योपयत्ता
धारणात्वादितियत्तुविशिष्टवैशिष्ट्यावगाहनुमितौविशिष्टवैशिष्ट्यावगाहिनीसिधिरेवविरोधिनीनतुकेवलंविशेष्यविशेष

३३

जामित्यादिरीत्याऽऽयमानापि सा तथापि तस्याः संसर्गीरोविशिष्टनिरूपितत्वानवगाहितया न्यूनविषयकत्वात् उत्तरबंधके
वले विशेष्ये विशेषणमिति न्यायेनानुमितेरुपगमेत्तादृशसिद्धदशायांतस्याः वारणीयतयातत्रतादृशसिद्धेर्विरोधि
वकल्पनाधिक्यमावश्यकमेवेतिकिमपराध्यंसाध्यविशेष्यकानुमितिरवीकारेणतद्वीकारेणविशिष्टविशेष्यत्वानवगा
हिसाध्यविशेषणकानुमितेरनभ्युपगमेनप्रतिबध्यप्रतिबंधकभावस्यमितिलाघवंविशिष्टनिरूपितविशेष्यता
नमात्रविरोधिबाधादिकालेकेवलविशेष्यविशेषणमितिन्यायेनानुमितेःसर्वसंमतत्वात्तत्रतादृशसिद्धेःप्रतिबं
धकतायाःआवश्यकत्वेनसाध्यविशेष्यकानुमितिरवीकर्तुरधिकप्रतिबंधकताकल्पनारूपदुर्वारत्वादितियदिचवि
शिष्टप्रतियोगिकविलक्षणत्वंविशिष्यानवगाहित्वंचविशिष्टविशेषणकत्वानविशिष्टत्वानमपीतितदानुल्ल्ययु
क्तमविशिष्टविशेष्यकत्वानपिविशिष्टविशेष्यत्वानहेतुतयासाध्यतावच्छेदकविशिष्टविशेष्यकानुमितिरप्रसिध्
साध्यकत्वेनरूपणीयेनसंभवतिनच्यविशेष्यत्वानरूपविशिष्टबुद्धावहेतुतयातद्विशेषस्यापितद्धेतुतोचितत्वं

सामान्यप्रयासनिजन्यज्ञानेविशेष्यज्ञानेनैरपेक्ष्यनियमेनसामान्यहेतुत्वासंभवेपितुल्यरूपेणाप्यविशेषणत्वाव
गाहिज्ञानस्योपक्षविशिष्टोपरविशेषणत्वेनहेतुत्वायोगात्तत्रैवविशेषहेतुतायाःआवश्यकत्वात्तुल्यरूपेणविशेषणज्ञानु
स्यापिविशिष्टज्ञानहेतुतायाउच्छेदापत्तेश्चतुल्यरूपेणविशिष्टवाक्यार्थविशेष्यकशाब्दबोधेऽवांतरवाक्यार्थज्ञानापे
क्षानन्यसाध्यविशेष्यकानुमितौतुल्यरूपयोरेवपक्षनिष्ठयोरवच्छेदकयोःसाध्यविशेषकतानियमेनविशिष्टां
शेऽपरस्यैतिनविशिष्टविशेष्यज्ञानापेक्षेतिवाच्यंनेविशेष्यतावच्छेदकानुविद्धस्वभावविरुद्धताप्रसङ्गस्य
चनिर्धर्मिताव्छेदकस्याप्यभ्युपगमात्साध्यमिकाभावप्रयोज्यप्रतियोग्यधिकरणयोरभावविरोधेनसाध्यसाधनो
पपत्तिःतथाचसाध्यविशेष्यकानुमितिर्नियमेकेनेतिनदेंगि अथजलव्यापकीभूताभावप्रतियोगिपृथिवीत्व
वतीत्यादिपरामर्शजन्यद्रवादिरूपविशेषणज्ञानेविनास्परस्तरसकारिकापृथिव्यांजलंद्रवसाकारिकाजल
मितिरेवकथमुपपद्यतइतिचेन्नकथंचित्तत्रजलीयत्वमात्रपुरस्कारेणाभानुमित्युपगमादितिकणभुक्तिनः

३४

ननु सिषाधयिषाविरहविशिष्टसिध्यभावस्य पक्षतावच्छेदकसंदेहवत्तरामर्शपूर्वकत्वादिग्रंथेन सिषाधयिषापक्षतापक्षो
कृत्यव्याप्तिचारस्य सिद्धिकालीनानुमितिरूपलैंगादवस्थ्यं सिषाधयिषानाशो विशिष्टप्रतिबंधकस्य अनुमित्यव्यवहित
प्राक्क्षणेऽस्तत्वादित्याद्युपपत्तिसमाधानमाह अत्रेच्छेति व्याप्तिस्मरणादीत्यादिनाऽनुमितिद्वितीयक्षणोपयोगि
क्षधर्मताज्ञानं लक्ष्यीयते तादृज्ञानपरिग्रहः पूर्वेच्छेति व्याप्तिस्मरणादिपूर्वकालीनत्वर्थः परामर्शदशायामसत्यां सिधो
विरोध्याभावादेव विशिष्टाभावनिर्वाहेणानुमित्यनुपपत्तिरतः परामर्शकालेच सिद्धिसत्वमिति अनुमानेऽपि परामर्शो
द्वितीयक्षणे तदव्यवहितप्राक्क्षणे वेत्यादिः तदुपपत्तिप्रकारश्चाधस्तादुक्तिः एवंच सिषाधयि षापदतापक्षः सिषाध
यिषाविरहघटितादिदोषादेव हेत्वसिद्धिरावः ननु सर्वत्रैपुनरनुमितेरप्रमात्वमानापत्तिरवश्यमाह तथेति अनुमितिकारो
पत्वेवत्वर्थः कारणीभूतत्वमिति तथाचतादृशविशिष्टाभावात्मकं कारणं विनानुपपत्तिरेवेति सिद्धिरक्षणीयविशिष्टसिद्धानु
भावनिर्वाहकानुमितीच्छारूपमनोनैकक्षणावस्थायिन्याया मप्यनुमित्यायत्तानुमितिरूपत्वायनुपपत्तिरेवनतदनभि
धानेनन्यूनतापरिहारः एवंग्रंथमकृत्वेसिषाधयिषाविरहक्षणमारभ्यक्षणचतुष्टयात्मककालरूपेवविवक्षणीयेत्वात्त्रिक्षणे

नमितानुमितास्वलक्षणानुमितिनिर्वाह्येतिदूषणदुद्धानवकाशः एवं चानुमितोपनीतचतुर्थलक्षणेपंचमलक्षणेऽनुमितिरिति
ध्येयं वाच्यासिद्धाधियेषापदेनविवक्षणीयात्साच्च योग्यताच स्वोत्पत्तिरूपेति स्वप्रागभावोनारभेत्यर्थः स्वस्योत्पत्तिर्य
त्मादितिव्युत्पत्त्यास्वोत्पत्तिपदस्य स्वप्रागभावपरत्वादन्यथा सिद्धाधिजातनिकालेयोग्यतानुपपत्त्या तद्वितीयक्षणेऽनुमि
तेरनिर्वाहात्तु सिध्यनुपादः सिद्धिप्रागभावः तथाचस्वप्रागभावध्वंसानधिकरणविषयसिद्धिप्रागभावरूपानुमित्ययोग्यतेति
पर्यवसितंतेनानुमित्यापूर्वतद्विषयीभूतसिध्यनंतरंचानुमितिवारणायदलद्वयोपादानंनच्यानागतानांयावद नुमितीनामे
वंजनुमित्याविषयत्वसंभवेनस्वविषयीभूतैकानुमितावुपन्यायामपिव्यक्त्यंतरप्रागभावसादाययोग्यताप्रसंगइतिना
ध्येस्वविषयसिद्धिलाक्षणिकप्रागभावस्य विवक्षितत्वात्तु आत एवस्वनिष्ठयेत्युक्तं यत्किंचिद्दोषात्तद्ध्वंसवर्तिकालसामा
न्यधर्मावच्छिन्नप्रागभावासंभवेनसिद्धिलाक्षणिकप्रागभावस्यकदाप्यसत्वात्। सामान्यधर्मस्यप्रागभावप्रतियोगिता।
वच्छेदकत्वानंगीकारेपुनःस्वविषयसिध्यसमानकालीनतत्तत्प्रागभावविशेषोदयेनैवानुमितिर्घटानुमितिस्त्यज्यतां
मित्यादीक्षानंतरंघटानुमित्यादिरूपविषयसिद्धावपिवक्ष्यमाणानुमित्युपपत्तिनिष्फलसाध्यपक्षनिरूपावगाहिन्यि

३९

यार्थकं अनुमितोत्तरं दिक्साद्यविलंबेनापि अनुमितिप्रसंगात् इत्यन्वयः अंगुल्यादेः विषयसन्निधित्वाद्विच्छि
न्नागमाभावात् तत्र योग्यताक्षतेर्नोपस्थितिसंभव इत्यतोऽंगुल्यादेरनुमित्यनुपादकत्वमिति दिङ्मात्रक्षणादिविलंबेनानुमिते
रिष्टत्वा
दिक्साद्यविलंबेनेति सिध्यत्यतो अनुमितेरिष्टत्वादिंद्रियादिनानिर्णीतलिंगेननिर्णीतसाध्यजन्यत्वानुमित्यनुपा
दकत्वनरसंपत्तीयतः इंद्रियादिनेति आदिनाशब्दादपरिग्रहः अनुमितेति एवं अनुमित्या अनुमितिलक्षणेन व्यवहितेन
रोपस्थितिक्षणमारभ्य क्रमेण पक्षविषयकलिंगज्ञानव्याप्तिस्मरणपरामर्शसंशयानुसंधानतोयावत्काले न परामर्श
शेषसिद्धिः अनुमितेरुपस्थितिक्षणमारभ्य तत्क्षणपर्यंतं यावंतः क्षणाः तावन्मात्रक्षणावस्थायीस्थूलकालः तत्समुदाय
येवयर्थः एवंचक्षणपंचतुष्टयं तदधिकरणक्षणानवस्थायिस्थूलकालोवायोग्यतेतिपर्यवसितं तदनुगमश्चैवं भाग
भावानधिकरणत्वस्वध्वंसाधिकरणसमयध्वंसाधिकरणसमयध्वंसाधिकरणविषयसंबंधेनविषयतासंबंधेन विषयतया न
कालत्वेन नवनुगतेन तत्तत्कालत्वेनगौरवात् तत्तत्कालोत्पत्तिजनकतापेक्षया तत्तत्सन्निधिपदानामेवनिवेशोचित्या
तूयोग्यतायाउत्पत्तिजनकत्वेऽपिवक्ष्यमाणायाः पूर्वानुभितावलादनुमित्युत्तरमनुमितेरसंभवात्तत्रानुमितिप्र

अनुमितिर्वा तदाक्षेपस्याऽधिकस्य कालस्योत्तेजकत्वमावश्यकमित्याशयेनाह अनुमितेरायत्यनन्तरमिति अनुमितेरायत्यनन्तरं
क्षामारभ्यतदुत्तरमित्यर्थः यावत्कालं मध्ये अनुमितिर्जायेतइत्यन्वयेनान्वयः अनुमितेरुत्तरमनुमितान्तरात्पुत्रादिवत्ता
दिविलंबेनापि सिध्यनन्तरमनुमित्युदयावत्कालस्यानुत्तेजकत्वात् अनुमितानाद्योपीति प्रागनुमित्सायामस्यामपीत्यर्थः अ
सत्यांसिध्योऽनुमितेरुत्तरं देवदत्तादिविलंबेनाप्युनुमित्युदयासिध्योसत्यामिति प्रागिया दिः यावत्कालं मध्ये यावत्क्षणानन्तर
न क्षपणं तावानेवकालः तावत्क्षणाधिकक्षणोत्तरभावी अनुमितया अनुमितार्थकसिषाधयिषापदेन उपलक्षितः विवक्षितः
अनुमितेरायोग्यतायाः उत्तेजकत्ववत्सिध्योग्यतायाः अपि तुल्ययुक्त्या प्रतिबंधकत्वमित्याशयेनाह यदिच्छसि सिध्यनन्तरं
इवेतिशेषः तेननानयोर्वैयर्थ्यं द्वितीयक्षणानंतरं येति द्वितीयक्षणमध्ये त्रिक्षणमध्ये चेत्यर्थः सिध्यत्युत्तरक्षणेपंचमक्षणेवा ति
पलितेसिध्यासिध्यर्थकपदेन तावानेवतत्कालानंतरमपि द्विक्षणस्थायी त्रिक्षणस्थायीवाउपलक्षणीयः विवक्षणीयः
ननुसिध्युत्तरंकियत्क्षणामध्येअनुमितिर्नजायतेकियत्क्षणानंतरंवाजायतइत्यस्यविशिष्यनिर्णेतुमशक्यत्वात्कालस्य
प्रतिबंधकत्वकल्पनमसंगतमिएवमुत्तेजकत्वकालस्यापिविशिष्यनिर्णेतुमशक्यत्वात्तदुत्तेजकत्वमपितथास्यतउक्तंयदि
शिष्यतिअवधृतःसावधानैःनियमःनिर्णयःतथाचैषांविशिष्यतावत्कालनिर्णयोनास्तीतिषामेवतत्रविशिष्यप्रतिबं

धकलाध्यपगमाभाविष्यतिअन्येषांतुसामान्यतएवेतिभावः केचित्तुननुकालविशेषणांसिध्यसिसाध्यधर्माधिकरण
कालत्वेनचेत्तत्प्रतिबंधकोनेतत्कभावः तदाधिककालस्यापितथात्वप्रसंगः अनतिप्रसक्तानुगतधर्मान्तरंचदुर्वचमेव
सत्याहविशिष्यतिअनतिप्रसक्तानुगतविशेषणविशेषनिवेश्येयर्थः क्षणनिष्ठमःकतिपयक्षणानामेवतथात्वंनत्वधि
करणानामितिनियमनिर्वहःउक्तहेतोःनिरुक्तिकुशलैःसिध्यद्भिसत्तिक्षणमारभ्यक्षणचतुष्टयादेःसंभागभा न
वानाधिकरणस्यनाशाधिकरणसमयनाशाधिकरणसमयनाशाधिकरणोभयसंबंधैसिध्यादिमत्वमेवानुग
मकमनतिप्रसक्तं नेतिभावस्यधिव्याचक्षतेवदंतीत्यस्वरसस्तुनायंसचोक्तपरंपरायाःसंबंधत्वमानाभावात्तत्त्व
क्तिनेनोत्तेजकोपगमउक्तदोषापातादितिदिक्प्रदर्शनायाविषयसिध्यैसत्यांचरितार्थतयानोत्तरकालमनुमितिर्जन्यतइति
तद्व्यवस्थायत्वविषयसिध्यनुपपत्तिवेनेष्टविशेषणीयाःतत्रतद्विषयसिध्यदवस्थांपरामर्शानुमितावसमवधा
नसंभवएवतद्विशेषणमर्थवद्भवतितआपाततोनघटतेक्षणपरामर्शयोर्युगपदुत्पादासंभवेनानुमितिकाले
एकतरविनाशावश्यकत्वादितत्सद्व्यतिअत्रचेतिसिध्प्रतिबंधकतावच्छेदककोटौचेत्यर्थःतद्दिष्टाविषय

सिध्यनुपहितयोंर्न हि दोषज्ञानमियमिमेणान्वयः निर्णीयेच्छा निर्णीयत्वप्रकारकेच्छाऽनुमितित्वप्रकारकेच्छायाश्च प्रयत्नात्मक
सिध्यच्चरितार्थतयातद्भेदानादरेसिध्यनंतरमप्यनुमितेरुपनीतानुपयोगात् स्मानोपात्ता) अनुमितेरप्युत्तरकाले वि
शेषणज्ञानोपयोगेनंतरपूर्वमेवतद्भेदितप्रयत्नसामग्रीसमवधानस्यावश्यतयाप्रयत्नसामग्र्याबलवत्वेनइच्छोत्पत्ति
रेवनसंभवतीत्यर्थः पूर्वोक्तन्यायेनानुमितेरपूर्वकालोपनीतादिप्रकारेणयर्थःस्मरणेविशेषणज्ञानापेक्षाविरहादु
क्तप्रयासंविनैवेच्छाद्वितीयक्षणेविशिष्टपक्षस्यस्मरणंनिर्वहतीतिसंधायाहस्मरणंचेत्यनुमितित्वप्रकारकेच्छायाम
पितद्विशेषणदानस्यसप्रयोजनत्वमाहयत्रचेतिसाध्यव्याप्यविशिष्टपक्षस्मरणानंतरमनुमितिरेवभवितुंनार्हतीत्यस्य
नोऽनुमितिसामग्रीविघटनोतथाविधस्मरणस्यसाध्यविशिष्टपक्षविषयकानुस्मरणंतृतीयक्षणेसाध्यस्
ध्याप्यस्यचानुमितेर्द्वितीयक्षणेसाध्यतध्याप्ययोरनुमित्यायाश्चनिर्वाहायसाध्यव्याप्यतध्याप्यविशिष्टपक्षत
द्वत्वानुमितिनिष्ठस्साध्यताविषयकत्वानुधावनंसाध्यानुमितेस्तदनंतरंपुनस्तदनुमित्यापत्त्यसंपादनायसाध्या

नुमित्साया: साध्यव्याप्यत्वापिनिश्चितयातदनुमितेःसंपादनाय-चसाध्यव्याप्यानुमितायास्तत्सत्तोत्साहादिनानुसरणंअनु
मित्साद्वितीयक्षणेसाध्यस्यअननुमितौतदनंतरंतदनुमितिरिष्टेवसाध्यव्याप्यस्यानुमितौचपरामर्शस्यापान्तरालसंभव
इत्यतस्तदनंतरमुभयानुमित्यनुधावनंअनुमित्सासन्निधणावधिकक्षणचतुष्टयादिरूपतत्प्रयोग्यतायाउत्तेजक मायत्र
पर्वतोवह्निमनुमिनुयामितीच्छातोवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शस्तदनंतरंचपर्वतोवह्निमानित्यनुमितिस्तदनंतर
मपितादृशानुमित्सापिःसंभवतीत्यतआह योग्यतेतितद्दिग्विषयसिध्यनुपहितायैतद्दिग्यांविशेषणंदेयमितिदोषः नस्व
रूपासिद्धिरसमवहितानुमितिंप्रत्यक्षान्यत्वानादिप्रकारकेशाबलादेवानुमित्सुसयातद्दिग्विषयेतिसिध्यविशेषणं
विशेष्यनुपपत्तेरभिमतायाइष्टतद्दिग्विषयेत्यर्थः अथेतादृशेच्छायाउत्तेजकीभूतसकलेच्छासाधारण्येनानुमितिप्रयत्नेच्छा
त्वेन निवेशेप्रयत्नाख्यात्मकसिध्यरपिनिर्णयत्वादिप्रकारकानुमितौविषयतयाविषयांतरस्याव्यावर्तकतापसंगः
तत्साध्यत्वेननिवेशेचोत्तेजकीभूतेच्छाव्यक्तिसमसंख्याकाभावानांसिध्योविशेषणतयागौरवंतत्तद्दिग्विषयसिध्यनु

पहितत्वादिछायाउनेजकतामपेक्ष्यलाघवात्तत्तद्विशेषणावच्छिन्नछावनंतथात्वकल्पनाप्रसंगाश्येनित्वेनप्रागुक्तयुक्त्याश्
छाविषयतावच्छेदकतायाः प्रकृतसाध्यविशिष्टप्रकृतपक्षविषयकत्वादिपर्यंतनिवेश्यावश्यकतयाइछाविषयतावच्छे
दकतापर्यंतस्याधिकरणरूपपर्यंतस्यानेछायाः पृथगुनेजकतायाः आवश्यकत्वात्तत्तद्धर्मावच्छिन्नानुपहि
तत्वंनिवेश्यानीयमित्यत्रतात्पर्यंतुजातएवानुमितिरयंजायतामित्येतादृशेछाबलात्तत्तदनुमितिः यमप्युपपद्यतेएकानु
मित्युपधानदशायामपिहितावच्छिन्नानुपहितत्वस्यसत्वात्तत्तदनुमितिविषयकत्वस्वरूपसामानाधिकरण्यायसंबंधेनप्रक
तपक्षधर्मकप्रकृतसाध्यविशिष्टान्यत्वमेवानुपहितत्वंसाध्यपर्यंतस्याध्यापयतीत्याऽनुमितिदशायांइछायाःसिध्यविशि
ष्टवैशिष्ट्यपर्यंतविशिष्टान्यत्वमध्याहृत्यप्रकृतपक्षकप्रकृतसाध्यकानुमितिविषयकसमूहालंबनेछायांयत्रअन्यपक्षक
कानुमितेरन्यसाध्यकानुमितेर्वाविषयतात्रयंहृत्वादन्यानुमितिरन्यंप्रकृतानुमितिंनिर्वाहायप्रकृतपक्षेप्रकृतसा
ध्यावगाहिनंनिश्चयविशेषणंएतद्विशेषणमनंतभाव्यिहितादिप्रकारकेछायाःपृथगुनेजकत्वंगीकारात्तादृशेछाबला

दनुमितेरंतरमनुमित्युपपत्तिः द्वित्वप्रकारकेछाबलाच्चनानुमि[illegible]तिरुद्यानंतरमनुमितेरंतरं। तावत्पर्यंतमनुमितायाः
एवानवस्थानात्। योग्यतायाउत्तेजकतामतेच द्वित्वादिप्रकारकेछायोग्यतायाः द्वित्वाधवच्छिन्नानुपहितत्वेनैवपर्यवस्थे
यमुत्तेजकतावाच्येति। कामतिरिक्तत्वेननिच्छायाइच्छाघटितानिरूप्यत्वायाः वाऽभावेनविद्वेषायाःसिध्ये
दभावस्यपक्षतावेयत्साध्यकयत्पक्षकस्यलेखदाचिदपिकस्यचिद्विज्ञानजातंत्रपक्षबाधसिध्दिस्यात्कायंवि
ध्वंसीयणीभाग[illegible]वच्छिन्नमादायकेषांचित्समाधानमाहेतुत्वादस्यलेइच्छाविरहविशेषितसिध्यभावएवपक्ष
तेतिसमाधत्तेपक्षसाध्येतिपक्षतावच्छेदकसाध्यतावच्छेदकादिनेदंनेत्यर्थः पक्षतावेदादितिसिध्यपदार्थत्रयंरालप
क्षतावच्छेदकादित्यादिनिरावः यत्रेतियादृशपक्षकयादृशसाध्यकस्यलइत्यर्थः सिध्यनंतरंकदाचिदप्यनुमि
तिर्नजातेतिसिध्यिकालेपरामर्शसहजनुमितायाअसमवधानादितिभावः सिध्यभावमात्रमितिइच्छाभावविशेषि

तायाएवसिध्येरभावस्यर्थः सिध्यिकालीनानुमितेरनुरोधेनैवविशिष्टसिध्यभावस्यपक्षतावोपगमादितिभावः तेने
तियत्रानुमितेरुत्पत्तिरप्रसिध्यत्प्रसिध्यतिवानानुमितेरुपादानोपयोगिनीतत्रविशिष्टाभावस्यपक्षतास्वीकारप्रयोजनवि
रहेणायर्थः उक्तिसाधारण्येतिसर्वत्रैवपक्षतायाः सिषाधयिषाविरहविशिष्टसिध्यभावपदार्थस्वसंपादनायेयर्थः मा ष्यम्
पादेयइतिशेषेक्यस्यानुपादेयताकारणतावच्छेदकगौरवसहितायाजन्यत्वादितिभावः परामर्शपूर्वकालीनेनानु
मितेनाद्योऽनुमितिरंत्यक्षणमकल्पत्वेनायोग्यतायाश्चोक्तेऽकरणमनादेरनुमितिमुपादयतः सार्वभौमस्यमतमाह
यांतेतिसिषाधयिषानाद्योसतियादृशसिध्यनंतरमनुमितिरंत्यस्याः सिषाधयिषाविरहविशिष्टस्वरूपाव्यवहितोत्तर
क्षणोत्पत्तिकानुमितिकतायाभिन्नानिवेशात्तादृशतेबंधकतोपपत्तेः सिषाधयिषाविरहविशिष्टस्वरूपस्यस्वाधि
करणदेशावच्छेदनबोध्यंतेनासिषाधयिषावतोपिकालस्यसिषाधयिषानधिकरणदेशावच्छेदनसिषाधयिषाविरहवि

विशिष्टतया यत्रक्रमेणसिषाधयिषासिद्धिपरामर्शानुमितयस्तत्रसिषाधयिषा[redacted]विरहविशिष्टत्वेनोपपाद्यस्यानुमित्युप
पत्तिक्षणनिष्ठस्याव्यवहितत्वस्यैवानुपपत्तितादवस्थ्यंपरामर्शप्रतियोगित्वेयधिकरण्यस्याभावविशेषणतासादृश्यसिषाध
यिषाधिकरणक्षणावारणंपुनरनुपादेयंप्रतियोगिपदेनसिषाधयिषाविरहप्रतियोगिनएवविशिष्यावश्यंविवक्षणीयत्व
यासिषाधयिषायाःसिषाधयिषातन्निवेशानमुपेक्ष्यसिषाधयिषाविरहप्रतियोगितन्निवेशस्यविशेषदलाभसि
द्धत्वंतुल्यत्वात्सिषाधयिषानधिकरणक्षणनिवेशेन्यसिषाधयिषाविरहांशेवैयर्थ्यंतु वक्ष्यमाणक्षणत्वनिवेशानव्या
वर्त्यसंगतेश्चारत्वेषामवक्षणानांसिषाधयिषाविरहविशिष्टपूर्वपूर्वक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणतयात्ता
दृशध्वंसानधिकरणत्वस्याव्यवहितोत्तराश्रयक्षणाप्रसिद्धिरतःसिषाधयिषाविरहविशिष्टतत्तत्क्षणाधिकरणत्वनिवे
शः।चपदंगोदप्रतियोगितातात्पर्यग्राहकंपरंसिद्धिसामान्यपरंतुसर्वेषामवक्षणानांपूर्वपूर्वसिध्यधिकरणकालध्वं
साधिकरणकालध्वंसाधिकरणतया[redacted]पूर्ववदप्रसिद्ध्यापत्तिःविरहविशिष्टक्षणाव्यवहितोत्तरक्षणनिवेशोऽनुरुद्ध

योर्युगपदुपादमतेयत्रानुमितात्तीयक्षणेघटेच्छासिध्यात्मकपरामर्शोत्तदुत्तरंचानुमितिस्तत्रतादृशसिध्योरिच्छाविरह
विशिष्टस्याधिकरणाप्रसिध्येच्छाविरहविशिष्टस्वाधिकरणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकसिध्येभिन्नेवसा
सिध्येरनुमितौविरहविशिष्टतत्स्वावरुद्धपरामर्शोत्पत्तिक्षणेऽनन्तरमनुमेयनुपपत्तिरतःसिषाधयिषानिवे
शाऽन्यथा(स्तीनेच्छयोर्युगपदुपादानुपगमे)च्छासामान्यनिवेशेयत्रघटेच्छानंतरक्षणेसिध्यात्मकपरामर्शस्तदनंत
रक्षणेसिध्यप्रामाण्यग्रहस्तदनंतरानुमितिः सिध्येरप्रामाण्यज्ञानानारब्धेतायाएवजनुमितिप्रतिबंधकत्वानु
त्तत्रतादृशानुमित्युपत्तिक्षणेरयेच्छाविरहविशिष्टसिध्येतीयक्षणाव्यवहितोत्तरतयासिध्येरचपदेनोपादानसंभवे
नाविरोधितयाऽप्रामाण्यग्रहकालेऽनुमितिवारणायसिषाधयिषापदंतथासत्यनुमित्युपादक्षणस्यसिषाधयिषा
विरहविशिष्टसिध्युपादक्षणोव्यवहितत्वाभावान्नापत्तिः(स्तीनेच्छयोर्युगपद्यानप्युपगम्येदंत्रानुमितादितीय
क्षणेसिध्यात्मकपरामर्शस्तदनंतरंघटेच्छातत्रतादृशसिध्यधिकरणस्यकस्यापिक्षणस्येच्छाविरहविशिष्टत्वाभावा

नस्याः स्वपदेनोपादातुमशक्यत्वात्सिषाधयिषाविरहविशिष्टतदभावोनानुमित्यव्यवहितपूर्वक्षणइतितत्रानुमिति
निर्वाहायेच्छासामान्योपक्षणमितिनव्याधीयःघटोत्पत्तिक्षणेपूर्वमनुमितिसामग्रीसत्त्वेनानुमित्यनुत्पादबीज
स्यदुर्घटत्वात्नचानुमितापूर्वकालीनत्वापेक्षाबुध्यात्मकबाधादिवशात्तदानीमनुमित्यनुत्पादस्यतुल्यत्वात्अनपेक्षाबुध्य
नंतरक्षणेविशेषगुणांतरावनुपक्षावत्तस्याःक्षणत्रयावरुद्धनरकभावात्ययत्नयत्रानुमित्यनंतरंघटेच्छातदनंत
रंसिध्यात्मकपरामर्शात्तदनंतरंचानुमितिरितित्रानुमित्युपादक्षणोनेच्छाविरहविशिष्टसिध्यधिकरणाव्यवहितो
त्तरक्षणइतिलाघवात्सिध्यत्तदनुमितिप्रतिबंधकतायासिषाधयिषापर्याप्तानुधावनइतितदभ्यसतूरुच्छाविरहवि
शिष्टस्वक्षणाव्यवहितोत्तरवृत्तिशरीरेऽध्यक्षप्रतियोगिनिस्वक्षणेवेच्छाविरहविशिष्टसंवेदनस्यप्रयोज
नवत्तयोत्तरवृत्तिप्रतियोगिनिस्वक्षणेतद्विशिष्टवस्याधिकरण्याऽसंवेदनीयतयोक्तानुमित्युत्पत्तिक्षणपर्यंतेच्छाविरहवि
शिष्टतत्सिध्यधिकरणक्षणाव्यवहितत्वयालाघवात्सिध्युत्पादक्षणोत्तरत्वयाचतादृशसिध्यिच्छाविरहविशिष्टस्व

क्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वाज्जनुमित्यनिर्वाहविरहात्तु तच्चयत्रसिषाधयिषातत्सिध्यात्मकः प
रामर्शीरूपत्वेऽप्रामाण्यग्रहात्मिकाजनुमितिः तत्रानुमितिद्वितीयक्षणेजनुमितिवारणायोत्तरवदत्रापि सिषा
धयिषाविरहविशेषणमावश्यकमिति वाच्यं यत्रसिषाधयिषानावश्यकः परामर्शीरूपोनुमितिः रूपं
हेऽप्रामाण्यग्रहात्मिकातत्रद्वितीयक्षणेऽनुमिति[illegible]नः तथापि दुर्वारत्वात् तस्माद्वितीयक्षणैरव्यवहितोत्तरत्वम

तिविरहात्

तेनैतद्दोषस्यैतद्दोषस्यापि[illegible]एवंतानिष्ठयोर्योगिपक्षानभ्युपगमेतृतीयक्षणासाधारणाव्यवहि
तोत्तरत्वनिवेशाकल्पेसिषाधयिषावैयर्थ्यबोध्यंपरंतुतत्कल्पेऽव्यवहितोत्तरक्षणेसिषाधयिषाविरहस्यैवजन्यामो
ण्यग्रहाश्रयस्यापिविशेषणत्वावश्यकंयत्रक्रमेणसिषाधयिषासिध्यात्मकपरामर्शानुमितयस्तत्राप्रामाण्यग्रह
कालेऽनुमितिवारणायैवथवाऽप्रामाण्यग्रहस्योज्जीवनंनस्वीक्रियतेकिंवप्रामाण्यग्रहकालेविनष्टव्यक्तेःप्रतिबंध

कालांतरं कालत्येतेनोत्तरक्षणेऽप्रामाण्यग्रहाभावानिवेद्योसिषाधयिषानाद्याकालोपन्नसिध्यात्मकपरामर्शादप्रामाण्यग्रहो
मुकोनुमित्यनुपपत्तेःतद्विवक्षायांतृतीयक्षणेऽनुमित्यापत्तेरपि निरस्तात्। प्रथमविशेष्यांशव्याप्तिरस्तुसिषाध
यिषापूर्वस्वमनःकस्यचित्तूत्पन्नकालस्यपरामर्शोपस्थितिकालेविनाद्यापूर्वक्षणावच्छेदेनसिषाधयिषाविरहविशिष्टसिध्य
धिकरणोत्पाद्याकालध्वंसाधिकरणपरामर्शोपस्थितिक्षणध्वंसाधिकरणस्यानुमित्युपस्थितिक्षणस्यसिषाधयिषाविरहविशिष्ट
सिध्यधिकरणकालाव्यवहितोत्तरत्वानुपपत्तेरनंतकालपदमुपेक्ष्यक्षणपदोपादानेनचसिषाधयिषाविरहविशिष्टस्वनि
रूपिताधिकरणत्वनिवेद्योनाप्युक्तस्थूलकालस्यविभिन्नक्षणावच्छेदेनसिषाधयिषाविरह[illegible]सिध्युपाद्याधिकरणेऽपि
सर्वदैवविशेष्यांशेव्याप्तेरसंभवात्क्षणत्वनिवेशानमंजसे
णेवव्याप्तिःसंभवतीतिवाच्यंसिषाधयिषापूर्वक्षणादेःसिध्यक्षणादेश्चप्रत्येकंविशिष्टाभावानवच्छेदकत्वेपिनदुभयानुग
गमकान्यतरत्वाध्यवच्छिन्नस्यैकक्षणावच्छिन्नवाविशेषितसामानाधिकरण्यसंबंधेनसिषाधयिषाविरहविशिष्टायाः

सिध्येराधिकरणतावच्छेदके बाधकतावादकरूपावच्छिन्नस्यैव विरुध्यत्वावच्छेदकत्वविरोधात् अन्यथातत्कालैकतरा
वच्छिन्नप्रयुक्तस्य सिषाधयिषाविरहसिध्युपयोगितावच्छेदकसंबन्धेन विरोधे नूतनदुष्टत्वापत्तेश्च अवच्छिन्नाधिकरणतायाः
ज्ञानेविहानतूतनदुष्टत्वापत्तीतिरप्यनुपपन्नः एवंचैकक्षणावच्छिन्नत्वेनाधिकरण्यसंबन्धेनैकविशिष्टपराधिकरणत्व
मेवोक्तस्थलकालेनसंभवतीतस्यैकक्षणावच्छिन्नाधिकरणत्वनियतत्वानुक्षणध्वंसाप्रतियोग्यवच्छिन्नदण्डादेर्यस्य
स्याधिकरणोक्षणत्वनिवेशायोचितः वस्तुतस्तु केवलसामानाधिकरण्यसंबन्धेनैकविशिष्टपराधिकरणत्वादाकदाचि
द्विशेषणवतिविशेष्यतावादेवनतुविशेषणतावच्छेदकतयातथाचसिषाधयिषाविरहवत्यपि स्थले सिषाधयिषासि
ध्युपयोगाधिकरणक्षणेनसिषाधयिषाविरहरूपविशेषणतावच्छेदकतद्विशिष्टसिध्यभावस्यतादृशकालस्यविशिष्टाधि
करणत्वनिराबाधमेव एतेनसिषाधयिषाएवक्षणस्यसिध्यनधिकरणत्वेनस्यानधिकरणत्वस्यवदतोव्याघातः
चरमक्षणावनवच्छेदकत्वेनस्थलकालेसिषाधयिषाविरहविशिष्टसिध्येरतीतावच्छेदकत्वमितितत्साधारणरूपाव
च्छिन्नस्यविशिष्टसिध्यधिकरणतावच्छेदकतयासंभवेपिनक्षतिः यद्यपिसिषाधयिषाविरहोविशेष्यावच्छेदेनस्वाधिक

रणावनिवेशेपितादृशकालेकालान्तरीयासिषाधयिषाविरहवैशिष्ट्यस्यतन्निष्ठसिध्यधिकरणतानवच्छेदकत्वात्तादृ
शकालेमादायोक्तदूषणस्यानवकाशः तथापिसिषाधयिषाविरहवैशिष्ट्यापत्तौसिध्यधिकरणावनिवेशाभिप्रायेण
क्षणत्वोपादानंव्यर्थमित्याशङ्क्यादरूपतादृशरूपलकालस्यापिक्षणावच्छिन्नस्यक्षणतयाक्षणावनिवेशेपितद्दोषतादव
स्थ्यंतथापिस्वरूपतियावच्छंसविशिष्टस्वरूपक्षणावच्छेदनसिषाधयिषाविरहविशिष्टावनिवेशानान्तदोषः सिषाधयि
षाविरहविशिष्टक्षणस्वाधिकरणत्वमवश्यंसिषाधयिषाविरहवैशिष्ट्यावच्छिन्नंतादृशस्यूलकालतुल्याधिकरणावश्यचन
तदवच्छिन्नत्वनियमइतिसिषाधयिषाविरहवैशिष्ट्यावच्छेदनस्वाधिकरणावत्तालाभायैवक्षणपदोपादानंननुक्षणावत्त्वमपिनि
विष्टमितिचेन्न अव्यवहितोत्तरक्षणोयत्तिःस्वाधिकरणावच्छेदनबोध्याजनुमितिपदंवास्वरसमानाधिकरण्यानुमितिप
